उत्फुल्लवान्, सम्फुल्लः-सम्फुल्लवान्, फालितः, पिफलिषितः, पम्फुलितः-तवान्;

फलम्, [1]फेलिवान्, फालः, पिफलिषुः, पम्फुलः;

फलितव्यम्, फालयितव्यम्, पिफलिषितव्यम्, पम्फुलितव्यम्;

प्रतिफलनीयम्, फालनीयम्, पिफलिषणीयम्, पम्फुलनीयम्;

फाल्यम्, फाल्यम्, पिफलिष्यम्, पम्फुल्यम्;

ईषत्फलः-दुष्फलः-सुफलः; — —

फल्यमानः, फाल्यमानः, पिफलिष्यमाणः, [2]पम्फुल्यमानः;

फालः, फालः, पिफलिषः, पम्फुलः;

फलितुम्, फालयितुम्, पिफलिषितुम्, पम्फुलितुम्;

[3]फुलितः, फालना, पिफलिषा, पम्फुला;

फलनम्, फालनम्, पिफलिषणम्, पम्फुलनम्;

फलित्वा, फालयित्वा, पिफलिषित्वा, पम्फुलित्वा;

प्रफल्य, प्रफाल्य, प्रपिफलिष्य, प्रपम्फुल्य;

फालम् २, फलित्वा २, } फालम् २, फालयित्वा २, } पिफलिषम् २, पिफलिषित्वा २, } पम्फुलम् २; पम्फुलित्वा २; }

[4]फल्गुः.

## (1091) “ फुल सञ्चलने ”

(VI-तुदादिः-1390. अक. सेट्. पर.) कुटादिः।

धातुरयं सिद्धान्तकौमुद्यां केवलमुपात्तः। क्षीरतरङ्गिणी-धातुवृत्त्यादिषु कुत्रापि नोपलभ्यते। ‘स्फुल—’ इत्यस्य पाठभेदोऽयमिति ज्ञेयम्। फोलकः-लिका, फोलकः-लिका, पुफुलिषकः-षिका, पोफुलकः-लिका; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककुटतिवत् (204) ज्ञेयानि।

---

1. कर्तरि, लिटः क्वसौ, ‘तृफलभजत्रपश्च’ (6-4-122) इत्येत्वाभ्यासलोपे, ‘वस्वेकाजाद्घसाम्’ (7-2-67) इतीडागमे च रूपम्।
2. यङन्तात् यकि, ‘हलो यमां यमि लोपः’ (8-4-64) इति यङो यकारस्य विकल्पेन लोपः। लोपाभावपक्षे तु ‘पम्फुल्य्यमानः’ इत्यपि साधुः। एवं यङन्तात् ल्यप्यपि ज्ञेयम्।
3. क्तिनि, इण्निषेधे, ‘ति च’ (7-4-89) इत्युत्वे रूपमेवम्।
4. ‘फलिपाटि–’ (द. उ.1-103) इत्युप्रत्यये गुगागमे च रूपम्। फल्गुः = असारः।